# NCERT Solutions Class 8 Sanskrit (Deepakam)

## Chapter 11 सन्निमित्ते वरं त्यागः (ख-भागः)

**अभ्यासात् जायते सिद्धिः (पृष्ठ 131–135)**

**१. निम्नलिखितेषु वाक्येषु रक्तवर्णीयानि स्थूलपदानि आधृत्य प्रश्ननिर्माणं कुरुत-**

**(क) वीरवरो पत्नीं पुत्रं दुहितरञ्च प्राबोधयत् ।**

_______________________________

**उत्तराणि :** कः पत्नीं पुत्रं दुहितरञ्च प्राबोधयत् ?

**(ख) ततस्ते सर्वे सर्वमङ्गलायाः आयतनं गताः ।**

_______________________________

**उत्तराणि :** ततस्ते सर्वे कस्याः आयतनं गताः?

**(ग) वीरवरः वर्तनस्य निस्तारं पुत्रोत्सर्गेण अकरोत्।**

_______________________________

**उत्तराणि :** वीरवरः वर्तनस्य निस्तारं केन / कथम् अकरोत् ?

**(घ) राजा स्वप्रासादं प्राविशत् ।**

_______________________________

**उत्तराणि :** राजा कुत्र प्राविशत् ?

**(ङ) महीपतिः वीरवराय समग्रकर्णाटप्रदेशम् अयच्छत्।**

_______________________________

**उत्तराणि :** महीपतिः कस्मै समग्र कर्णाटप्रदेशम् अयच्छत्?

**२. अधोलिखितान् प्रश्नान् उत्तरत-**

**(क) वीरवरः किम् अवर्णयत् ?**

**उत्तराणि :** वीरवर : अखिलराजलक्ष्मीसंवादम् अवर्णयत्।

**(ख) प्राज्ञः धनानि जीवितञ्च केभ्यः उत्सृजेत् ?**

**उत्तराणि :**प्राज्ञः धनानि जीवितं च परार्थे उत्सृजेत् ।

Get More Learning Materials Here : CLICK HERE www.studentbro.in

**(ग) केन सदृशः लोके न भूतो न भविष्यति ?**

**उत्तराणि :** वीरवरेण सदृशः लोके न भूतो न भविष्यति ।

**(घ) का अदृश्या अभवत्?**

**उत्तराणि :** भगवती सर्वमङ्गला अदृश्या अभवत्।

**(ङ) सपरिवारः वीरवरः कुत्र गतवान्?**

**उत्तराणि :** सपरिवारः वीरवरः स्वगृहं गतवान्।

**३. अधोलिखितेषु वाक्येषु रक्तवर्णीयपदानि केभ्यः प्रयुक्तानि इति उदाहरणानुगुणं लिखत-**

उदाहरणम्-धन्यः अहम् स्वामिजीवितरक्षार्थं विनियुक्तः । – शक्तिधराय

**(क) भगवति ! न मे प्रयोजनं राज्येन जीवितेन वा ।**

**उत्तराणि :** नृपाय / राज्ञे

**(ख) वत्स! अनेन ते सत्त्वोत्कर्षेण भृत्यवात्सल्येन च परं प्रीतास्मि ।**

**उत्तराणि :** नृपाय / राज्ञे

**(ग) धन्याहं यस्या ईदृशो जनको भ्राता च ।**

**उत्तराणि :** वीरंवत्यै

**(घ) तदेतत्परित्यक्तेन मम राज्येनापि किं प्रयोजनम् ।**

**उत्तराणि :** नृपस्य/शूद्रकाय/राज्ञे

**(ङ) अयम् अपि सपरिवारो जीवतु ।**

**उत्तराणि :** वीरवराय/राजपुत्राय ।

**४. उदाहरणानुसारं अन्वयरूपेण लिखत-**

**यथा-** कृतो मया गृहीतस्वामिवर्तनस्य निस्तारो स्वपुत्रोत्सर्गेण । गृहीतस्वामिवर्तनस्य निस्तारो मया स्वपुत्रोत्सर्गेण कृतः ।

**(क) नेदानीं राज्यभङ्गस्ते भविष्यति ।**

________________________________________

**उत्तराणि :** इदानीं ते राज्यभङ्गः न भविष्यति ।

Get More Learning Materials Here : CLICK HERE www.studentbro.in

**(ख) तेन पातितं स्वशिरः स्वकरस्थखड्गेन।**

______________________________

**उत्तराणि :** तेन स्वकरस्थखड्गेन स्वशिरः पातितम्।

**(ग) तदा ममायुः शेषेणापि जीवतु राजपुत्रो वीरवरः सह पुत्रेण पत्न्या दुहित्रा च ।**

______________________________

**उत्तराणि :** तदा ममायुः शेषेणापि राजपुत्रो वीरवरः पुत्रेण पत्न्या दुहित्रा च सह जीवतु ।

**(घ) तत्क्षणादेव देवी गताऽदर्शनम् ।**

______________________________

**उत्तराणि :** तत्क्षणादेव देवी अदर्शनम् गता।

**(ङ) महीपतिस्तस्मै प्रायच्छत् समग्रकर्णाटप्रदेशं राजपुत्राय वीरवराय ।**

______________________________

**उत्तराणि :**

**(च) जायन्ते च म्रियन्ते च मादृशाः क्षुद्रजन्तवः।**

______________________________

**उत्तराणि :** मादृशाः क्षुद्रजन्तवः जायन्ते मिय्रन्ते च।

**५. उदाहरणानुगुणम् अधोलिखितानां पदानां पदच्छेदं कुरुत-**

यथा-यद्येवमस्मत्कुलोचितम् = यदि-एवम्-अस्मत्-कुलोचितम्
सत्त्वोत्कर्षेण = सत्त्व-उत्कर्षेण

(क) गृहीतस्वामिवर्तनस्य = ______________
(ख) निस्तारोपायः = ______________
(ग) गृह्यतामेष = ______________
(घ) स्वपुत्रोत्सर्गेण = ______________
(ङ) स्वकरस्थखड्गेन = ______________
(च) तदेतत्परित्यक्तेन = ______________
(छ) स्वशिरश्छेदनार्थमुत्क्षिप्तः = ______________
(ज) मद्दर्शनाददृश्यताम् = ______________
(झ) तत्क्षणादेव = ______________

Get More Learning Materials Here : CLICK HERE www.studentbro.in

(ञ) लब्धजीवितः = ______________

**उत्तराणि :** (क) गृहीत – स्वामि-वर्तनस्य

(ख) निस्तार – उपायः

(ग) गृह्यताम्-एषः

(घ) स्वपुत्र – उत्सर्गेण

(ङ) स्वकरस्थ-खड्गेन

(च) तत्-एतत्-परित्यक्तेन

(छ) स्वशिरः-छेदनार्थम्-उत्क्षिप्तः

(ज) मत्-दर्शनात् – अदृश्यताम्

(झ) तत्-क्षणात्-एव

(ञ) लब्ध- जीवितः

**६. (क) उदाहरणानुगुणं पाठगतानि पदानि अधिकृत्य सन्धियुक्तपवैः रिक्तस्थानानि पूरयत-**
**यथा-स्व + आवासम् = स्वावासम्**

**1. तत् + श्रुत्वा =** ______________
**उत्तराणि :** तच्छ्रुत्वा

**2. दुहितरम् + च =** ______________
**उत्तराणि :** दुहितरञ्च

**3. धन्यः + अहम् =** ______________
**उत्तराणि :** धन्योऽहम्

**4. जीवितम् + च + एव =** ______________
**उत्तराणि :** जीवितञ्चैव

**5. विलम्बः + तात =** ______________
**उत्तराणि :** विलम्बस्तात

**6. कः + अधुना =** ______________
**उत्तराणि :** कोऽधुना

Get More Learning Materials Here : CLICK HERE www.studentbro.in

**7. न + आचरितव्यम् = ______________**

**उत्तराणि :** नाचरितव्यम्

**8. धन्या + अहम् = ______________**

**उत्तराणि :** धन्याहं

**9. निस्तारः + उपायः = ______________**

**उत्तराणि :** निस्ताररुपाय

**10. वीरवरः + अवदत् = ______________**

**उत्तराणि :** वीरवरोऽवदत्

**11. ततः + असौ = ______________**

**उत्तराणि :** ततोऽसौ

**12. ततः + ते = ______________**

**उत्तराणि :** ततस्ते

**(ख) निम्नलिखितपदानां सन्धिच्छेदं कुरुत-**

**1. शूद्रकोऽपि = ______________ + ______________**

**उत्तराणि :** शूद्रक : + अपि

**2. पुनर्भूपालेन = ______________ + ______________**

**उत्तराणि :** पुनः + भूपालेन

3. महीपतिस्तस्मै = ______________ + ______________

उत्तराणि : महीपालः + तस्मै

**4. प्रायच्छत् = ______________ + ______________**

**उत्तराणि :** प्र + अयच्छत्

**5. नृपतिरपि = ______________ + ______________**

**उत्तराणि :**नृपतिः + अपि

Get More Learning Materials Here : CLICK HERE www.studentbro.in

**6. सर्वेषामदृश्य =** _______________ **+** _______________

**उत्तराणि :** सर्वेषाम् + अदृश्य

**7. वार्ताऽन्या =** _______________ **+** _______________

**उत्तराणि :** वार्ता + अन्याः

**8. राज्यभङ्गस्ते =** _______________ **+** _______________

**उत्तराणि :** राज्यभङ्गः + ते

**9. गतिर्गन्तव्या =** _______________ **+** _______________

**उत्तराणि :** गतिः + गन्तव्या

**10. इत्युक्त्वा =** _______________ **+** _______________

**उत्तराणि :** इति + उक्त्वा

**11. नेदानीं =** _______________ **+** _______________

**उत्तराणि :** न + इदानीं

**12. प्रीतास्मि =** _______________ **+** _______________

**उत्तराणि :** प्रीता + अस्मि

**७. अधोलिखितानि कथनानि कथायाः घटनानुसारं लिखत-**



**(क) सर्वं दृष्ट्वा राजा शूद्रकः अपि सर्वस्वसमर्पणार्थं सिद्धः अभवत्।**

**उत्तराणि :** वीरवरो गृहं गत्वा पत्नीं पुत्रं पुत्रीञ्च प्राबोधयत्, सर्वां च वार्ताम् अकथयत्।

Get More Learning Materials Here : CLICK HERE www.studentbro.in

**(ख) पितुः वार्तां श्रुत्वा शक्तिधरः प्रसन्नतया स्वस्य समर्पणार्थं सिद्धः अभवत्।**
**उत्तराणि :** पितुः वार्तां श्रुत्वा शक्तिधरः प्रसन्नतया स्वस्य समर्पणार्थं सिद्धः अभवत् ।

**(ग) प्रातः राजा वीरवरम् अपृच्छत् 'हयः रात्रौ किम् अभवत्"?**
**उत्तराणि :** वीरवरः परिवारेण सह सर्वस्वसमर्पणम् अकरोत्।

**(घ) वीरवरो गृहं गत्वा पत्नीं पुत्रं पुत्रीञ्च प्राबोधयत्, सर्वां च वार्ताम् अकथयत्।**
**उत्तराणि :** सर्वं दृष्ट्वा राजा शूद्रकः अपि सर्वस्व समर्पणार्थं सिद्धः अभवत्।

**(ङ) वीरवरेण उक्तम् – स्वामिन्! न कापि वार्ता । सा नारी अदृश्या अभवत्।**
**उत्तराणि :** भगवती प्रसन्ना अभवत्। भगवत्याः कृपया सर्वे जीवितवन्तः।

**(च) भगवती प्रसन्ना अभवत् । भगवत्याः कृपया सर्वे जीवितवन्तः।**
**उत्तराणि :** प्रातः राजा वीरवरम् अपृच्छत् "हयः रात्रौ किम् अभवत्"?

**(छ) वीरवरः परिवारेण सह सर्वस्वसमर्पणम् अकरोत्।**
**उत्तराणि :** वीरवरेण उक्तम् – स्वामिन् ! न कापि वार्ता । सा नारी अदृश्या अभवत्।

**योग्यताविस्तारः**

**१. श्लोकानां पदच्छेदम् अन्वयं भावार्थं च पठत स्मरत च-**

धनानि जीवितञ्चैव परार्थे प्राज्ञ उत्सृजेत्।
सन्निमित्ते वरं त्यागो विनाशे नियते सति॥ ? ॥
पदच्छेदः – धनानि जीवितम् च एव परार्थे प्राजः उत्सृजेत् सन्निमित्ते वरम् त्यागो विनाशे नियते सति।

अन्वयः – प्राजः धनानि जीवितम् चैव परार्थे उत्सृजेत्। विनाशे नियते सति सन्निमित्ते त्यागो वरम्।

भावार्थः – परोपराकार्थं बुद्धिमान् सम्पदां जीवनं च त्यक्तुं सिद्धः भवेत्। यतः शरीरस्य नाशः तु भवति एव। अतः तस्य सत्कार्यार्थं त्यागः श्रेष्ठः खलु।

जायन्ते च म्रियन्ते च मादृशाः क्षुद्रजन्तवः।
अनेन सदृशो लोके न भूतो न भविष्यति॥ २॥

Get More Learning Materials Here : CLICK HERE www.studentbro.in

पदच्छेदः – जायन्ते च म्रियन्ते च मादृशाः क्षुद्रजन्तवः अनेन सदृशः लोके न भूतः न भविष्यति।
अन्वयः – मादृशाः क्षुद्रजन्तवः जायन्ते च म्रियन्ते च। लोके अनेन सदृशः न भूतः न भविष्यति च।
भावार्थः – मत्सदृशाः अल्पाः जन्म मृत्युं च प्राप्नुवन्ति। एतादृशः जनः तु लोके पूर्वं न जातः न अग्रे भविष्यति च।

**२. (क) सुभाषितानि पठत स्मरत च-**



यथा चतुर्भिः कनकं परीक्ष्यते निघर्षणच्छेदन-ताप-ताडनैः।
तथा चतुर्भिः पुरुषः परीक्ष्यते कुलेन शीलेन गुणेन कर्मणा॥
कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।
मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि॥
यो हि स्वधर्मनिरतः स तेजस्वी भवेदिह।
विना स्वधर्मान्न सुखं स्वधर्मो हि परं तपः॥

**(ख) अकर्मकधातुलक्षणम्-**
धातोरर्थान्तरे वृत्ते धात्वर्थेनोपसङ्ग्रहात्।
प्रसिद्धेरविविक्षातः धातोरकर्मिका क्रिया॥

**परियोजनाकार्यम्**

पाठस्य कथाधारेण सरलसंस्कृतेन एकं नाटकं रचयत तस्य मञ्चनं च कुरुत।

**अत्र इदम् अवधेयम्**
**वाच्यं त्रिविधम्।**
१. कर्तृवाच्यम्
२. कर्मवाच्यम्
३. भाववाच्यम्।

Get More Learning Materials Here : CLICK HERE www.studentbro.in

कर्तृवाच्यम्

कर्तृवाच्ये वाक्ये कर्तृपदस्य प्रथमाविभक्तिः भवति क्रियापदं कर्तृपदानुसारि च भवति। अर्थात् क्रियापदस्य पुरुषः वचनं च कर्तृपदस्य अनुसारेण भवति। वाक्ये कर्मपदम् अस्ति चेत् तस्य द्वितीयाविभक्तिः भवति।

यथा-

बालक : ग्रामं गच्छति। त्वं ग्रामं
गच्छसि। अहं ग्रामं गच्छामि।



बालकाः ग्रामं गच्छन्ति। यूयं ग्रामं
गच्छथ। वयं ग्रामं गच्छामः।



कर्मवाच्यम्

कर्मवाच्ये कर्तृपदस्य तृतीया विभक्तिः, कर्मपदस्य प्रथमाविभक्तिः तथा च क्रियापदं कर्मपदानुसारि भवति। अर्थात् क्रियापदस्य पुरुषः वचनं च कर्मपदस्य अनुसारेण भवति।
यथा-

Get More Learning Materials Here : CLICK HERE www.studentbro.in

बालकेन ग्रामः गम्यते। त्वया ग्रामः गम्यते। मया ग्रामः गम्यते।

बालकेन ग्रामाः गम्यन्ते। युष्माभिः ग्रामाः गम्यन्ते। अस्माभिः ग्रामाः गम्यन्ते।



अत्र ध्यातव्यं यत् कर्मवाच्ये कर्मपदस्य प्रथमा-विभक्तिः कर्तृपदस्य च तृतीया विभक्तिः भवति।
क्रियापदस्य रूपं "धातुः + य + आत्मनेपदम्" भवति।
यथा — गम् (धातु) + य + ते (आत्मनेपदप्रत्ययः) = गम्यते।
एवं पठ्यते, लिख्यते, खाद्यते इत्यादीनि यकार-सहितानि भाव-कर्मवाचकक्रियापदानि भवन्ति।


भाववाच्यम्

अकर्तृवाच्यवाक्ये यदि कर्मपदस्य अभावः भवति तर्हि भाववाच्यस्य प्रयोगः भवति। तदा कर्तृपदस्य तृतीया-विभक्तिः भवति क्रियापदस्य च केवलम् एकम् एव अपरिवर्तनीयं रूपं भवति। तत् च प्रथमपुरुषस्य एकवचनं रूपम्।

**यथा-**

बालकेन हस्यते। बालकैः हस्यते।

त्वया हस्यते। युष्माभिः हस्यते।




मया हस्यते। अस्माभिः हस्यते। इत्येवम्।

अत्र ध्यातव्यं यत् हस्यते इति क्रियापदं कर्तृपदानां परिवर्तने अपि अपरिवर्तनीयं भवति। इदम् अपि ध्यातव्यं यत् केचन धातवः सर्वदा अकर्मकाः भवन्ति। यथा – हस्, क्रन्द्, स्था, स्ना, शी, भू इत्यादयः।

Get More Learning Materials Here : CLICK HERE www.studentbro.in